# SANSKRIT

## SUMMATIVE ASSESSMENT- I & II

DESIGNED

AND

DEVELOPED

BY

**D.A.V. CENTRE FOR ACADEMIC EXCELLENCE**

in a workshop

held at

(D.A.V. College Managing Committee)
Chitragupta Road, Pahar Ganj,
New Delhi-110 055

from 28th to 30th

April, 2014

# संस्कृतम्

## प्रश्न-पत्र प्रारूप

I. Weightage to Learning objectives :

| Objectives | अपठित अवबोधनम् | रचनात्मक-कार्यम् (पत्र-संवाद-चित्रवर्णनम्) | अनुप्रयुक्त व्याकरणम् | पठित अवबोधनम् | कुल |
|---|---|---|---|---|---|
| % of Marks : | 5.5% | 16.5% | 39% | 39% | 100% |
| Marks | 5 | 15 | 35 | 35 | 90 |

II. Weightage to form of Questions :

| Form of questions : | LA | SA-I | SA-II | MCQ | O | Total |
|---|---|---|---|---|---|---|
| No. of questions : | 15 | 18 | – | 20 | – | 53 |
| Marks : | 42 | 28 | – | 20 | – | 90 |

III. Weightage to Content :

| Name of Unit | Marks |
|---|---|
| खण्ड 'क'<br>अपठित अवबोधनम् | 5 |
| खण्ड-ख<br>रचनात्मक-कार्यम् | 15 |
| खण्ड-ग<br>अनुप्रयुक्त-व्याकरणम् | 35 |
| खण्ड-घ<br>पठित-अवबोधनम् | 35 |
| Total | 90 |

IV. Scheme of Sections : क, ख, ग, घ

VI. Weightage to difficulty level :

1. Difficult questions ____10____% 3. Easy questions : ____50____%
2. Average questions : ____40____%

VII. Expected length of answers to different types questions & time management.

| *Type of questions* | *Excepted length for each* | *Expected time answer* |
|---|---|---|
| 1. Long Answer (LA) | 15 | 1 घंटा |
| 2. Short Answer (SA-I / SA-II) | 18 | 1 घंटा |
| 3. Multiple Choice Question (MCQ) | 20 | 1 घंटा |

# संस्कृतम्

## अंक योजना

| S. No. | Content Unit / Form of Questions | *LA* | *SA-I* | *SA-II* | *VSA* | *MCQ* | *Total Marks* |
|---|---|---|---|---|---|---|---|
| 1. | अपठित गद्यांश: | 2(2) | 1(2) | – | | 2(4) | 5(8) |
| 2. | चित्र-आधारितवर्णनम् | 5(1) | – | – | | | 5(1) |
| 3. | पत्रम् | 5(1) | – | – | – | | 5(1) |
| 4. | संवाद लेखनम् | 5(1) | – | – | – | | 5(1) |
| 5. | सन्धि: | | 3(1) | | | | 3(1) |
| 6. | शब्दरुपाणि | | | | | 6(2) | 6(2) |
| 7. | सङ्ख्या | | 2(1) | | | 1(1) | 3(2) |
| 8. | अव्ययपदानि | | 3(1) | | | | 3(1) |
| 9. | उपसर्ग: | | 3(1) | | | | 3(1) |
| 10. | कारक-विभक्ति: | 5(1) | | | | | 5(1) |
| 11. | समास: | | 3(1) | | | | 3(1) |
| 12. | धातुरुपाणि | | | | | 5(1) | 5(1) |
| 13. | प्रत्यया: | 4(1) | | | | | 4(1) |
| 14. | पठित-गद्यांश: | 2(2) | 1(2) | | | 2(4) | 5(8) |
| 15. | पद्यांश: | 2(2) | 1(2) | | | 2(4) | 5(8) |
| 16. | संवाद: | 2(2) | 1(2) | | | 2(4) | 5(8) |
| 17. | भावबोधनम् | | 4(2) | | | | 4(2) |
| 18. | अन्वय: | | 4(2) | | | | 4(2) |
| 19. | घटनाक्रम: | 5(1) | | | | | 5(1) |
| 20. | प्रश्ननिर्माणम् | 5(1) | | | | | 5(1) |
| 21. | शब्दमेलनम् | | 2(1) | | | | 2(1) |
| | Total | 42(15) | 28(18) | | | 20(20) | 90(53) |

**Summary**

| | | |
|---|---|---|
| Long Answer Type (LA) | = 15 | Marks = 20 |
| Short Answer Type (S I) | = 18 | Marks = 28 |
| Short Answer Type (S II) | = — | Marks = 09 |
| Very Short Answer (VSA ) | = — | Marks = 12 |
| Multiple Choice Question (MCQ) | = 20 | Marks = 21 |
| | 53 | 90 |

# संस्कृतम्

## (संकलनात्मक मूल्यांङ्कनम्-I)

**निर्धारितावधि : होरात्रयम्** **पूर्णाङ्काः 90**

*निर्देशाः*

1. *अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।*
2. *प्रतिखण्डम् उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।*
3. *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् क्रमे लेखनीयानि।*
4. *प्रश्नपत्रे उत्तराणि न लेखनीयानि।*
5. *प्रश्नसङ्ख्या प्रश्नपत्रानुसारं लेखनीया।*
6. *खण्डसङ्ख्या अपि लेखनीया।*

**खंडः-क (अपठित-अवबोधनम्)** **(5)**

1. अधोलिखितं अनुच्छेदं पठित्वा प्रश्नान् उत्तरत–

प्रकृत्यां सर्वेषां प्राणिनाम् महत्त्वं वर्तते। प्रकृतेः सन्तुलनाय सर्वे जीवाः आवश्यकाः सन्ति। परन्तु वयं पश्यामः यत् स्वार्थवशात् मानवाः अनेकेषां जीवानाम् हिंसां कुर्वन्ति येन प्रकृतेः सन्तुलनं दुष्प्रभावितं जातम्। अस्मात् कारणात् वृक्षाणां वनस्पतीनां च संख्या अपि न्यूनतरा अभवत्। अतः प्राकृतिक-आपद्घटनासु महती वृद्धिः दृश्यते। केदारनाथे प्राकृतिक-आपदाकारणात् अनेके जनाः पशवः च मृताः। अतः अस्माभिः मिलित्वा प्रकृतिसंरक्षणाय प्रयासः कर्त्तव्यः।

प्रश्नाः

I. एकपदेन उत्तरत– (½×2=1)

(i) प्रकृत्यां केषां महत्त्वं वर्तते?

(ii) कासु महती वृद्धिः जाता?

II. पूर्णवाक्येन उत्तरत– (1×2=2)

(i) प्रकृतेः सन्तुलनं कथं दुष्प्रभावितं जातम्?

(ii) केदारनाथे किम् अभवत्?

III. निर्देशानुसारम् उत्तरत– (½×4=2)

(क) 'पश्यामः' इति क्रियापदस्य कर्तृपदं किम्?

(i) जीवाः (ii) पशवः

(iii) वयम् (iv) जनाः

(ख) 'सर्वेषां प्राणिनाम्' अनयोः पदयोः विशेषणपदं किमस्ति?

(i) सर्वेषाम् (ii) प्रयासं

(iii) प्राणिनाम् (iv) वयम्

(ग) 'वृक्षाणां संख्या अपि न्यूना जाता' अस्मिन् वाक्ये अव्ययपदं चित्वा लिखत–

(i) संख्या (ii) न्यूना

(iii) अपि (iv) जाता

(घ) 'अहिंसां' इति पदस्य विलोमपदं गद्यांशात् चित्वा लिखत–

(i) हिंसां (ii) न्यूना

(iii) महत्त्वम् (iv) लुप्ताः

**खण्डः-ख (रचनात्मक-कार्यम्) (15)**

2. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्च वाक्यानि लिखत– (1×5=5)



मञ्जूषा

| |
|---|
| वृक्षः, बालकः, जलम्, नृत्यति, मेघाः, हरितः, स्नानम्, पादपाः, करोति, मयूरः, खगाः |

3. दिनद्वयस्य अवकाशार्थं प्रधानाचार्यं प्रति लिखिते पत्रे रिक्तस्थानानि मञ्जूषायाः उचितपदानि चित्वा पूरयत, पत्रं च उत्तरपुस्तिकायां लिखत– (½×10=5)

परीक्षाभवनम्

(i) ..........................

दिनाङ्कः ..........................

सेवायाम्

आदरणीयाः (ii) ..........................

डी.ए.वी. विद्यालयः

लिङ्गराजविहारम्, भुवनेश्वरम्।

महोदयाः!

सविनयं (iii) .......................... अस्ति यत् अहम् अष्टमकक्षायां (iv) ..........................। आगामिसप्ताहे मम ग्रामे भूकम्पपीडितजनानां (v) .......................... एकं शिविरं प्रचलिष्यति। अहम् अपि तस्मिन् (vi) .......................... पीडित-जनानां सहायतां कर्त्तुम् (vii) .........................। अतः मह्यं दिनद्वयस्य (viii) .......................... प्रदाय अनुगृह्णन्तु।

सधन्यवादम्,

भवताम् आज्ञाकारी (ix) ..........................

(x) ..........................

मञ्जूषा

| |
|---|
| शिष्यः, अवकाशं, निवेदनं, पठामि, शिविरे, प्रधानाचार्याः, इच्छामि, प्रतापः, भुवनेश्वरतः, सहायतायै |

4. अधोलिखितं संवादं पठित्वा मञ्जूषायां प्रदत्तपदैः रिक्तस्थानानि पूरयत– (½×10=5)

रमेशः – भो सुरेश! (i) .......................... कथम् अस्ति?

सुरेशः – (ii) .......................... तु सम्यक् अस्मि।

रमेशः – (iii) .......................... कुत्र गच्छसि?

सुरेशः – (iv) अहं .......................... ग्रामं गमिष्यामि।

रमेशः – किं कोऽपि विशेषः (v) .......................... वर्तते तत्र?

सुरेशः – अद्य तत्र (vi) .......................... भविष्यति।

रमेशः – केवलं मतदानाय गच्छति भवान्।

सुरेशः – आम्, भ्रातः।

रमेशः – किं मतदानम् एतादृशं (vii) .......................... भवति?

सुरेशः – बहु महत्त्वपूर्णं भवति।

रमेशः – (viii) .......................... ?

सुरेशः – मतदानम् अस्माकं (ix) .......................... अस्ति।

एवम् उत्तमं (x) .......................... चेतुम् मतदानम् आवश्यकम् भवति।

रमेशः – बहु शोभनम्! अहम् अपि मतदानाय गच्छामि।

मञ्जूषा

| |
|---|
| स्वकीयं, भवान्, अहम्, महत्त्वपूर्णम्, सर्वकारम्, |
| कथम्, अधिकारः, मतदानम्, कार्यक्रमः, त्वम् |

**खण्डः-ग (अनुप्रयुक्त-व्याकरणम्) (35)**

5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत– (1×3=3)

(i) तत्र <u>जलाशयः</u> अस्ति।

(ii) <u>हिमांशुः</u> बुद्धिमान् अस्ति।

(iii) <u>वर्षा + ऋतुः</u> तापं दूरीकरोति।

6. (अ) विकल्पेभ्यः उचितं शब्दरूपं चित्वा वाक्येषु रिक्तस्थानानि पूरयत– (½×6=3)

(क) .................... जलं पवित्रं भवति।

(i) नदी (ii) नद्यौ

(iii) नद्याः (iv) नदीम्

(ख) अस्य वृक्षस्य .................... मधुराणि सन्ति।

(i) फलैः (ii) फलम्

(iii) फलानि (iv) फलस्य

(ग) .................... भ्राता लक्ष्मणः आगच्छति।

(i) रामः (ii) रामम्

(iii) रामस्य (iv) रामाय

(घ) .................... पत्रं पतति।

(i) लता (ii) लतायाः

(iii) लतायाम् (iv) लतायै

(ङ) .................... बालकः हसति।

(i) गच्छत्	(ii) गच्छन्

(iii) गच्छतः	(iv) गच्छति

(च) .................... कुत्र गच्छतः?

(i) भवान्	(ii) भवन्तौ

(iii) भवन्तं	(iv) भवतः

(आ) उचितं सर्वनामपदं चित्वा रिक्तस्थानानि पूरयत– (1×3=3)

(क) .................... बालकाः चित्रं पश्यन्ति।

(i) सर्वाः	(ii) सर्वे

(iii) सर्वाणि	(iv) सर्वम्

(ख) .................... देवालयं गच्छामः।

(i) अहम्	(ii) यूयम्

(iii) आवाम्	(iv) वयम्

(ग) ह्यः .................... जन्मदिवसः आसीत्।

(i) तव	(ii) त्वम्

(iii) त्वया	(iv) त्वयि

7. (अ) कोष्ठके प्रदत्तसङ्ख्यां संस्कृतपदेन रिक्तस्थानयोः लिखत– (1×2=2)

(क) उद्याने ..................... (48) वृक्षाः सन्ति।

(ख) विद्यालये ..................... (30) कक्षाः सन्ति।

(आ) उचितं सङ्ख्यावाचकं पदं विकल्पेभ्यः चित्वा लिखत– (½×2=1)

(क) वेदाः .................... सन्ति।

(i) चत्वारि	(ii) चतस्रः

(iii) चत्वारः	(iv) चतुरः

(ख) .................. बालिकाः विद्यालयात् आगच्छन्ति।

(i) त्रयः	(ii) तिस्रः

(iii) त्रीणि	(iv) त्रीन्

8. मञ्जूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयत– (1×3=3)

(i) .................. राजा दशरथः आखेटाय अगच्छत्।

(ii) कोलाहलं .................... कुरु।

(iii) ईश्वरः ...................... अस्ति।

मञ्जूषा

| मा, सर्वत्र, एकदा |
|---|

9. रेखाङ्कितपदेषु उपसर्गं पृथक् कृत्वा योजयित्वा वा लिखत– (1×3=3)

(i) कुक्कुरः विडालम् अनु + धावति।

(ii) शिष्यः गुरोः समीपे उपविशति।

(iii) खगाः आकाशे उत् + पतन्ति।

10. रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत– (1×5=5)

(i) मार्गम् उभयतः वृक्षाः सन्ति।

(ii) सः कर्णाभ्याम् बधिरः अस्ति।

(iii) सा विद्यालयं प्रति गच्छति।

(iv) रामेण सह सीता गच्छति।

(v) परिश्रमं विना सफलता न प्राप्यते।

11. अधोलिखितेषु समस्तपदेषु समासस्य नामानि लिखत– (1×3=3)

(i) बालसभा (ii) धनलोभः (iii) ग्रीष्मवसन्तौ

12. विकल्पेभ्यः उचितं धातुरूपं चित्वा वाक्येषु रिक्तस्थानानि पूरयत– (1×5=5)

(क) बालिका मात्रा सह आपणं ........................।

(i) गमिष्यति (ii) गमिष्यतः

(iii) गमिष्यति (iv) गमिष्यामि

(ख) योग्याः छात्राः एव पुरस्कारं ........................।

(i) लप्स्यते (ii) लप्स्यन्ते

(iii) लप्स्यध्वे (iv) लप्स्येते

(ग) वयं शब्दरूपाणि ........................।

(i) स्मरावः (ii) स्मरन्ति

(iii) स्मरामः (iv) स्मरामि

(घ) यूयम् एतं पाठं .......................।

(i) पठन्तु (ii) पठ

(iii) पठतम् (iv) पठत

(ङ) लता मातरं .......................।

(i) सेवे (ii) सेवावहे

(iii) सेवामहे (iv) सेवते

13. अधोलिखितेषु वाक्येषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा लिखत– (1×4=4)

(i) बालकः गृहं (गम् + क्त्वा) खादति।

(ii) सः मातापितरौ (प्रणम्य) कार्यं करोति।

(iii) बालकः (खादन्) न वदति।

(iv) शृगालः वायुं (भक्षयित्वा) अपि हृष्टः पुष्टः अभवत्।

## खण्डः-घ (पठित-अवबोधनम्) (35)

14. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत– (5)

अहं नदी अस्मि। अहम् अस्याः वसुन्धरायाः सौन्दर्यम् अस्मि। मम साम्राज्यं सम्पूर्णे विश्वे अस्ति। अहं माता इव सम्पूर्णं विश्वं पालयामि। पर्वतानाम् उच्चेभ्यः स्थलेभ्यः निःसृत्य अहं सागरं प्रविशामि। अहं सर्वदाा गतिशीला अस्मि। गतिः एव मम स्वभावः मम सन्देशः च। मम तटेषु एव महानगराणां विकासः भवति। एतेषां महानगराणां समृद्धेः अहम् एव कारणम् इति जनाः कथयन्ति।

(I) एकपदेन उत्तरत– (½×2=1)

(क) नद्याः तटेषु केषां विकासः भवति?

(ख) नदी कस्याः सौन्दर्यम् अस्ति?

(II) पूर्णवाक्येन उत्तरत– (1×2=2)

(क) नद्याः साम्राज्यं कुत्र अस्ति?

(ख) जनाः किं कथयन्ति?

(III) निर्देशानुसारम् उत्तरत– (½×4=2)

(क) 'विश्वम्' इति विशेष्यपदस्य विशेषणपदं किम्?

(i) साम्राज्यं (ii) स्वभावः

(iii) पालयामि (iv) सम्पूर्णं

(ख) 'धरायाः' इति पदस्य समानार्थकं किं पदं गद्यांशे प्रयुक्तम्?

(i) अहम् (ii) अस्याः

(iii) वसुन्धरायाः (iv) सौन्दर्यम्

(ग) 'अहं सर्वदा गतिशीला अस्मि' इति वाक्ये अव्ययपदं किम्?

(i) अहं (ii) सर्वदा

(iii) गतिशीला (iv) अस्मि

(घ) 'अस्मि' इति क्रियापदस्य कर्तृपदं किम्?

(i) नदी (ii) नदी

(iii) पालयामि (iv) अहम्

15. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत– (5)

यः पठति लिखति पश्यति परिपृच्छति पण्डितान् उपाश्रयति।
तस्य दिवाकरकिरणैः नलिनीदलम् इव विकास्यते बुद्धिः।।

(I) एकपदेन उत्तरत– (½×2=1)

(क) मनुष्यः कान् उपाश्रयति?

(ख) नलिनीदलम् इव का विकास्यते?

(II) एकवाक्येन उत्तरत– (1×2=2)

(क) कस्य बुद्धिः विकास्यते?

(ख) नलिनीदलं कैः विकास्यते?

(III) निर्देशानुसारम् उत्तरत– (½×4=2)

(क) श्लोके कति क्रियापदानि सन्ति?

(i) चत्वारि (ii) पञ्च

(iii) षट् (iv) सप्त

(ख) 'मूर्खान्' अस्य पदस्य किं विलोमपदं श्लोके प्रयुक्तम्?

(i) दिवाकरः (ii) पण्डितान्

(iii) बुद्धिः (iv) नलिनीदलम्

(ग) 'रविः अस्य पदस्य किं पर्यायपदम् श्लोके प्रयुक्तम्?

(i) दलम् (ii) दिवाकरः

(iii) पण्डितान् (iv) बुद्धिः

(घ) 'नलिनीदलम् इव विकास्यते बुद्धिः' अस्मिन् वाक्ये अव्ययपदं किम्?

(i) नलिनीदलम् (ii) इव

(iii) विकास्यते (iv) बुद्धिः

16. अधोलिखितं संवादं पठित्वा प्रश्नानाम् उत्तराणि लिखत– (5)

प्रणवः – 'संस्कृतम्' इति पदस्य कः अर्थः?

विश्वासः – 'शुद्धम्', 'परिष्कृतम्' इति संस्कृतपदस्य अर्थः अस्ति।

सुमेधा – संस्कृतभाषायाः कति रूपाणि सन्ति?

प्रबुद्धः – संस्कृतभाषायाः द्वे रूपे स्तः। एकं वैदिकं द्वितीयं च लौकिकं संस्कृतम्।

प्रणवः – वैदिकसंस्कृतस्य प्रमुखं साहित्यं किम् अस्ति?

निष्ठा – चत्वारः वेदाः, ब्राह्मणग्रन्थाः, आरण्यक-ग्रन्थाः, उपनिषदः च वैदिकं साहित्यं कथ्यते।

सुमेधा – लौकिकसंस्कृतस्य आरम्भः कदा अभवत्?

विवेकः – वाल्मीकेः कालात् लौकिकसंस्कृतस्य प्रारम्भः मन्यते। अस्य कृतिः 'रामायणं' लौकिकसंस्कृतस्य आदिमः ग्रन्थः अस्ति।

(I) एकपदेन उत्तरत– (½×2=1)

(क) लौकिक-संस्कृतस्य आदिमः ग्रन्थः कः अस्ति?

(ख) संस्कृतभाषायाः कति रूपाणि सन्ति?

(II) पूर्णवाक्येन उत्तरत– (1×2=2)

(क) लौकिकसंस्कृतस्य आरम्भः कदा अभवत्?

(ख) वैदिकसंस्कृतस्य प्रमुखं साहित्यं किम् अस्ति?

(III) निर्देशानुसारम् उत्तरत– (½×4=2)

(क) 'प्रथमः' इति अर्थे संवादे किं पदं प्रयुक्तम्?

(i) कृतिः (ii) ग्रन्थः

(iii) आदिमः (iv) अस्ति

(ख) 'साहित्यम्' इति पदस्य विशेषण-पदं किम्?

(i) प्रारम्भः (ii) आदिमः

(iii) वैदिकं (iv) चत्वारः

(ग) 'लौकिकसंस्कृतस्य आरम्भः कदा अभवत्' अस्मिन् वाक्ये अव्यय-पदं किम्?

(i) संस्कृतस्य (ii) आरम्भः

(iii) कदा (iv) अभवत्

(घ) 'अशुद्धम्' इति पदस्य विलोमपदं किं संवादे प्रयुक्तम्?

(i) लौकिकं (ii) शुद्धम्'

(iii) कति (iv) आरम्भः

17. मञ्जूषायां प्रदत्तैः पदैः भावार्थे रिक्तस्थानानि पूरयित्वा भावार्थं लिखत– (1×4=4)

(अ) विद्या ददाति विनयम्।

भावार्थः – विद्या अर्थात् ज्ञानं (i) ........................ विनम्रतां यच्छति। जनाः विद्यया नम्रतां प्राप्नुवन्ति। अतः विद्यां प्राप्य (ii) ........................ मा कुरुत।

(आ) सत्यमेव जयते न अनृतम्।

भावार्थः – संसारे (i) ........................ एव जयः भवति न तु असत्यस्य। अतः (ii) ........................ सत्यं वदन्तु।

मञ्जूषा

| सत्यस्य, मनुष्याय, सर्वदा, अभिमानं |
|---|

18. अधोलिखितौ श्लोकौ पठित्वा उचितपदैः अन्वयं पूरयत– (½×8=4)

(अ) यः पठति लिखति पश्यति परिपृच्छति पण्डितान् उपाश्रयति।
तस्य दिवाकरकिरणैः नलिनीदलमिव विकास्यते बुद्धिः।।

अन्वयः – यः पठति (i) ........................ पश्यति परिपृच्छति (ii) ........................ उपाश्रयति, तस्य (iii) ........................ दिवाकरकिरणैः (iv) ........................ इव विकास्यते।

(आ) सर्वे भवन्तु सुखिनः,
सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु,
मा कश्चित् दुःखभाग् भवेत्।।

अन्वयः – सर्वे (i) ........................ भवन्तु, सर्वे निरामयाः (ii) ........................ सर्वे भद्राणि (iii) ........................ कश्चित् (iv) ........................ मा भवेत्।

19. अधोलिखितानि वाक्यानि कथाक्रमानुसारं लिखत– (1×5=5)

(क) अन्ते यात्री क्षमाम् अयाचत।

(ख) महात्मा विठोवा नगरात् बहिः वसति स्म।

(ग) महात्मा भोजनं विना एव स्वकुटीरं प्रत्यागच्छत्।

(घ) एकः नागरिकः महात्मानं रात्रिभोजाय प्रार्थयत्।

(ङ) भक्ताः दर्शनाय आगत्य तं स्वगृहम् आगन्तुम् आमन्त्रयन्ति स्म।

20. अधोलिखितेषु कथनेषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरूत– (1×5=5)

(क) चटकायाः गृहं नष्टम् अभवत्।

(ख) जलस्य अभावात् कृषिः न भवति।

(ग) चटका काकः च स्वनिवासम् अगच्छताम्।

(घ) कालिदासेन त्रीणि नाटकानि रचितानि।

(ङ) महानगराणां विकासः नद्याः तटेषु भवति।

21. अधोलिखितानां पदानाम् उचितार्थैः सह मेलनं कुरुत– (½×4=2)

| | |
|---|---|
| (क) लोचनम् | (i) वारिदः |
| (ख) मेघः | (ii) यशः |
| (ग) दिवाकरः | (iii) नेत्रम् |
| (घ) कीर्तिम् | (iv) रविः |

# संस्कृतम्

## ( संकलनात्मक मूल्याङ्कनम्-I )

## अंक विभाजन तथा उत्तर संकेत

अधिकतम अङ्क : 90

**निर्देश :** कोई भी ऐसा सही उत्तर जो परीक्षार्थी ने लिखा हो, परंतु निम्नलिखित उत्तर संकेत में सम्मिलित न हो तो उसके भी यथासंभव अंक दिए जाएँ।

| प्रश्न संख्या | उत्तर संकेत | मुख्य बिन्दु हेतु अंक | कुल अंक |
|---|---|---|---|
| | **खण्डः-क ( अपठित-अवबोधनम् ) ( 5 )** | | |
| 1. | I. (क) प्राणिनाम्<br>(ख) प्राकृतिक-आपद्घटनासु– | ½×2 | 1 |
| | II. (क) स्वार्थवशात् मानवाः अनेकेषां जीवानाम् हिंसां कुर्वन्ति येन प्रकृतेः सन्तुलनं दुष्प्रभावितं जातम्।<br>(ख) केदारनाथे प्राकृतिक-आपदाकारणात् अनेके जनाः पशवः च मृताः। | 1×2 | 2 |
| | III. (i) वयम् (ii) सर्वेषाम्<br>(iii) अपि (iv) हिंसां | ½×4 | 2 |
| | **खण्डः-ख ( रचनात्मक-लेखनम् ) ( 15 )** | | |
| 2. | चित्रवर्णनम्<br>छात्राः चित्रानुरूपं स्वेच्छया कानिचित् पञ्च वाक्यानि लेखिष्यन्ति। | 1×5 | 5 |
| 3. | पत्रलेखनम्–<br>(i) भुवनेश्वरतः<br>(ii) प्रधानाचार्याः<br>(iii) निवेदनम्<br>(iv) पठामि | ½×10 | 5 |

| | | | |
|---|---|---|---|
| | (v) सहायतायै<br>(vi) शिविरे<br>(vii) इच्छामि<br>(viii) अवकाशं<br>(ix) शिष्य:<br>(x) प्रताप: | | |
| 4. | संवादलेखनम्–<br>(i) भवान्<br>(ii) अहम्<br>(iii) त्वम्<br>(iv) स्वकीयम्<br>(v) कार्यक्रम:<br>(vi) मतदानम्<br>(vii) महत्त्वपूर्णम्<br>(viii) कथम्<br>(ix) अधिकार:<br>(x) सर्वकारम् | ½x10 | 5 |
| | **खण्ड:-ग ( अनुप्रयुक्त-व्याकरणम् ) ( 35 )** | | |
| 5. | 1. जल + आशय:<br>2. हिम + अंशु:<br>3. वर्षर्तु: | 1x3 | 3 |
| 6. | (अ) (क) (iii) नद्या:<br>(ख) (ii) फलानि<br>(ग) (iii) रामस्य | | |

| | | | |
|---|---|---|---|
| | (घ) (ii) लतायाः | | |
| | (ङ) (ii) गच्छन् | | |
| | (च) (ii) भवन्तौ | ½×6 | 3 |
| | (आ) 1. (ii) सर्वे | | |
| | 2. (iv) वयम् | | |
| | 3. (i) तव | 1×3 | 3 |
| 7. | (अ) 1. अष्टचत्वारिंशत् | | |
| | 2. त्रिंशत् | 1×2 | 2 |
| | (आ) (ii) चत्वारः | | |
| | (ii) तिस्रः | ½×2 | 1 |
| 8. | 1. एकदा | | |
| | 2. मा | | |
| | 3. सर्वत्र | 1×3 | 3 |
| 9. | 1. अनुधावति | | |
| | 2. उप+विशति | | |
| | 3. उत्पतन्ति | 1×3 | 3 |
| 10. | 1. द्वितीया विभक्तिः उभयतः योगे। | | |
| | 2. तृतीया विभक्तिः अङ्विकारयोगे। | | |
| | 3. द्वितीया विभक्तिः प्रति–योगे। | | |
| | 4. द्वितीया विभक्तिः सह–योगे। | | |
| | 5. द्वितीया विभक्तिः विना–योगे। | 1×5 | 5 |
| 11. | 1. तत्पुरुषः | | |
| | 2. तत्पुरुषः | | |
| | 3. द्वन्द्वः | 1×3 | 3 |

| | | | |
|---|---|---|---|
| 12. | (क) (iii) गमिष्यति<br>(ख) (ii) लप्स्यन्ते<br>(ग) (iii) स्मराम:<br>(घ) (iv) पठत<br>(ङ) (iv) सेवते | 1×5 | 5 |
| 13. | 1. गत्वा 2. प्र + नम् + ल्यप्<br>3. खाद् + शतृ 4. भक्ष् + क्त्वा | 1×4 | 4 |
| | **खंडः-घ (पठित-अवबोधनम्) (35)** | | |
| 14. | I. (क) महानगराणाम्<br>(ख) वसुन्धराया: | ½×2 | 1 |
| | II. (क) नद्या: साम्राज्यं सम्पूर्णे विश्वे अस्ति।<br>(ख) एतेषां महानगराणां समृद्धे: अहम् एव कारणम्<br>(इति जना: कथयन्ति।) | 1×2 | 2 |
| | III. (क) (iv) सम्पूर्णं<br>(ख) (iii) वसुन्धराया:<br>(ग) (ii) सर्वदा<br>(घ) (iv) अहम् | ½×4 | 2 |
| 15. | I. (क) पण्डितान्<br>(ख) बुद्धि: | ½×2 | 1 |
| | II. (क) य: पठति लिखति पश्यति परिपृच्छति पण्डितान्<br>उपाश्रयति। (तस्य बुद्धि: विकास्यते)<br>(ख) नलिनीदलं दिवाकरकिरणै: विकास्यते। | 1×2 | 2 |

| | | | |
|---|---|---|---|
| | III. (क) षट्<br>(ख) पण्डितान्<br>(ग) दिवाकरः<br>(घ) इव | ½×4 | 2 |
| 16. | I. (क) रामायणम्<br>(ख) द्वे | ½×2 | 1 |
| | II. (क) लौकिक संस्कृतस्य आरम्भः वाल्मीकेः कालात् अभवत्।<br>(ख) चत्वारः वेदाः ब्राह्मणग्रन्थाः, आरण्यक-ग्रन्थाः उपनिषदः च वैदिकं साहित्यं कथ्यते। | 1×2 | 2 |
| | III. (क) आदिमः<br>(ख) वैदिकं<br>(ग) कदा<br>(घ) शुद्धम् | ½×4 | 2 |
| 17. | (अ) (i) मनुष्याय | 1 | |
| | (ii) अभिमानं | 1 | |
| | (आ) (i) सत्यस्य | 1 | |
| | (ii) सर्वदा | 1 | 4 |
| 18. | (अ) (i) लिखति (ii) पण्डितान्<br>(iii) बुद्धिः (iv) नलिनीदलम्<br>(आ) (i) सुखिनः<br>(ii) सन्तु<br>(iii) पश्यन्तु<br>(iv) दुःखभाग् | ½×8 | 4 |

| | | | |
|---|---|---|---|
| 19. | (i) (ख) महात्मा विठोवा नगरात् बहिः वसति स्म।<br>(ii) (ङ) भक्ताः दर्शनाय आगत्य तं स्वगृहम् आगन्तुम् आमन्त्रयन्ति स्म।<br>(iii) (घ) एकः नागरिकः महात्मानं रात्रिभोजाय प्रार्थयत्।<br>(iv) (ग) महात्मा भोजनं विना स्वकुटीरं प्रत्यागच्छत्।<br>(v) (क) अन्ते यात्री क्षमाम् अयाचत। | 1×5 | 5 |
| 20. | (क) कस्याः<br>(ख) कस्य<br>(ग) कुत्र<br>(घ) कति<br>(ङ) कुत्र | 1×5 | 5 |
| 21. | (क) (iii) नेत्रम्<br>(ख) (i) वारिदः<br>(ग) (iv) रविः<br>(घ) (ii) यशः | ½×4 | 2 |

# संस्कृतम्

## प्रश्नानुसार विश्लेषण

| क्र.सं. | शैक्षणिक उद्देश्य | विशेष उद्देश्य | विषयवस्तु | प्रश्न प्रकार | निर्धारित अङ्क विभाजन | अनुमानित कठिनाई-स्तर |
|---|---|---|---|---|---|---|
| 1. | ज्ञानम् / अवबोधनम् | | अपठित-अवबोधनम् | अति-लघूत्तरात्मकम्<br>लघूत्तरात्मकम्<br>बहुवैकल्पिकम् | 2<br>1<br>2 | B/C |
| 2. | अभिव्यक्ति: | | चित्राधारितम् | निबंधात्मकम् | 5 | B |
| 3. | अभिव्यक्ति | | पत्रम् | निबंधात्मकम्<br>अति लघूत्तरात्मकम् | 5 | A |
| 4. | ज्ञानम् / बोधनम् | | संवादलेखनम् | अति-लघूत्तरात्मकम् | 5 | B/A |
| 5. | स्मृत्यात्माकम् | | सन्धि: | अति-लघूत्तरात्मकम् | 3 | B/C |
| 6. | स्मृत्यात्माकम् | | शब्दरूपाणि | बहुवैकल्पिकम् | 3<br>3 | B |
| 7. | स्मृत्यात्माकम् | | संख्या | लघूत्तरात्मकम्<br>बहुवैकल्पिकम् | 3 | B/C |
| 8. | स्मृत्यात्माकम् | | अव्ययपदानि | अति-लघूत्तरात्मकम् | 3 | C |
| 9. | स्मृत्यात्माकम् | | उपसर्गा: | अति-लघूत्तरात्मकम् | 3 | C |
| 10. | स्मृत्यात्माकम् | | कारक-विभक्ति: | लघूत्तरात्मकम् | 5 | B/C |
| 11. | स्मृत्यात्माकम् | | समास: | अति-लघूत्तरात्मकम् | 3 | B/C |
| 12. | स्मृत्यात्माकम् | | धातुरूपाणि | बहुवैकल्पिकम् | 5 | B/C |
| 13. | स्मृत्यात्माकम् | | प्रत्यया: | अति-लघूत्तरात्मकम् | 4 | B/C |
| 14. | ज्ञानम् / बोधनम् | | पठितगद्यांश:<br>पद्यांश: संवाद: | अति-लघूत्तरात्मकम्<br>लघूत्तरात्मकम्<br>बहुवैकल्पिकम् | 3<br>6<br>6 | B/C |

| क्र.सं. | शैक्षणिक उद्देश्य | विशेष उद्देश्य | विषयवस्तु | प्रश्न प्रकार | निर्धारित अङ्क विभाजन | अनुमानित कठिनाई-स्तर |
|---|---|---|---|---|---|---|
| 15. | ज्ञानम् / बोधनम् | | भावबोधनम् | अति-लघूत्तरात्मकम् | 4 | A |
| 16. | ज्ञानम् / बोधनम् | | अन्वयः | अति-लघूत्तरात्मकम् | 4 | C |
| 17. | ज्ञानम् | | घटनाक्रमः | लघूत्तरात्मकम् | 5 | C |
| 18. | ज्ञानम् | | प्रश्ननिर्माणम् | लघूत्तरात्मकम् | 5 | B/A |
| 19. | ज्ञानम् / बोधनम् | | शब्दमेलनम् | अति-लघूत्तरात्मकम् | 2 | C |

VSA (Very Short Answer Type) : 20
SA-I (Short Answer Type) : 18
SA-II (Short Answer Type) :
LA (Long Answer) : 15

*Difficult - A
Average - B
Easy - C

# संस्कृतम्

## प्रश्न-पत्र प्रारूप

I. Weightage to Learning objectives :

| Objectives | अपठित अवबोधनम् | रचनात्मक-कार्यम् (पत्र-संवाद-चित्रवर्णनम्) | अनुप्रयुक्त व्याकरणम् | पठित अवबोधनम् | कुल |
|---|---|---|---|---|---|
| % of Marks : | 5.5% | 16.5% | 39% | 39% | 100% |
| Marks | 5 | 15 | 35 | 35 | 90 |

II. Weightage to form of Questions :

| Form of questions : | LA | SA-I | SA-II | MCQ | O | Total |
|---|---|---|---|---|---|---|
| No. of questions : | 15 | 18 | – | 20 | – | 53 |
| Marks : | 42 | 28 | – | 20 | – | 90 |

III. Weightage to Content :

| Name of Unit | Marks |
|---|---|
| खण्ड 'क'<br>अपठित अवबोधनम् | 5 |
| खण्ड-ख<br>रचनात्मक-कार्यम् | 15 |
| खण्ड-ग<br>अनुप्रयुक्त-व्याकरणम् | 35 |
| खण्ड-घ<br>पठित-अवबोधनम् | 35 |
| Total | 90 |

IV. Scheme of Sections : क, ख, ग, घ

VI. Weightage to difficulty level :

1. Difficult questions ___10___% 3. Easy questions : ___50___%
2. Average questions : ___40___%

VII. Expected length of answers to different types questions & time management.

| *Type of questions* | *Excepted length for each* | *Expected time answer* |
|---|---|---|
| 1. Long Answer (LA) | 15 | 1 घंटा |
| 2. Short Answer (SA-I / SA-II) | 18 | 1 घंटा |
| 3. Multiple Choice Question (MCQ) | 20 | 1 घंटा |

# संस्कृतम्

## अंक योजना

| S. No. | Content Unit / Form of Questions | LA | SA-I | SA-II | VSA | MCQ | Total Marks |
|---|---|---|---|---|---|---|---|
| 1. | अपठित गद्यांश: | 2(2) | 1(2) | – | | 2(4) | 5(8) |
| 2. | चित्र-आधारितवर्णनम् | 5(1) | – | – | | | 5(1) |
| 3. | पत्रम् | 5(1) | – | – | – | | 5(1) |
| 4. | संवाद लेखनम् | 5(1) | – | – | – | | 5(1) |
| 5. | सन्धि: | | 3(1) | | | | 3(1) |
| 6. | शब्दरुपाणि | | | | | 6(2) | 6(2) |
| 7. | सङ्ख्या | | 2(1) | | | 1(1) | 3(2) |
| 8. | अव्ययपदानि | | 3(1) | | | | 3(1) |
| 9. | उपसर्ग: | | 3(1) | | | | 3(1) |
| 10. | कारक-विभक्ति: | 5(1) | | | | | 5(1) |
| 11. | समास: | | 3(1) | | | | 3(1) |
| 12. | धातुरुपाणि | | | | | 5(1) | 5(1) |
| 13. | प्रत्यया: | 4(1) | | | | | 4(1) |
| 14. | पठित-गद्यांश: | 2(2) | 1(2) | | | 2(4) | 5(8) |
| 15. | पद्यांश: | 2(2) | 1(2) | | | 2(4) | 5(8) |
| 16. | संवाद: | 2(2) | 1(2) | | | 2(4) | 5(8) |
| 17. | भावबोधनम् | | 4(2) | | | | 4(2) |
| 18. | अन्वय: | | 4(2) | | | | 4(2) |
| 19. | घटनाक्रम: | 5(1) | | | | | 5(1) |
| 20. | प्रश्ननिर्माणम् | 5(1) | | | | | 5(1) |
| 21. | शब्दमेलनम् | | 2(1) | | | | 2(1) |
| | Total | 42(15) | 28(18) | | | 20(20) | 90(53) |

**Summary**

| | | |
|---|---|---|
| Long Answer Type (LA) | = 15 | Marks = 20 |
| Short Answer Type (S I) | = 18 | Marks = 28 |
| Short Answer Type (S II) | = __ | Marks = 09 |
| Very Short Answer (VSA ) | = __ | Marks = 12 |
| Multiple Choice Question (MCQ) | = 20 | Marks = 21 |
| | 53 | 90 |

# संस्कृतम्

## ( संकलनात्मक-मूल्याङ्कनम्-II )

**निर्धारितावधि : होरात्रयम्** **पूर्णाङ्काः 90**

***निर्देशाः***

*1. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।*

*2. प्रतिखण्डम् उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।*

*3. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् क्रमे लेखनीयानि।*

*4. प्रश्नपत्रे उत्तराणि न लेखनीयानि।*

*5. प्रश्नसङ्ख्या प्रश्नपत्रानुसारं लेखनीया।*

*6. खण्डसङ्ख्या अपि लेखनीया।*

**खण्डः-क ( अपठित-अवबोधनम् )** **( 5 )**

1. अधोलिखितं अनुच्छेदं पठित्वा प्रश्नान् उत्तरत–

अद्यत्वे संसारे विविधयन्त्राणां प्रयोगः अधिकः भवति येन (मोबाइल) चलभाषियन्त्रस्य प्रयोगः तु सर्वत्र एव दृश्यते। बालाः, वृद्धाः सर्वे एव अस्य यन्त्रस्य अधिकाधिकं प्रयोगं कुर्वन्ति। एतस्मात् कारणात् छात्राणां रुचिः अध्ययने न्यूना भवति। चलभाषियन्त्रस्य प्रयोगं कुर्वन्तः जनाः वाहनं चालयन्ति, रेलमार्गस्य पारं गच्छन्ति। येन दुर्घटनाः भवन्ति। अतः अस्य प्रयोगः सावधानेन आवश्यकतानुसारेण एव कर्त्तव्यः

I. एकपदेन उत्तरत– (½×2=1)

(क) संसारे केषां प्रयोगः अधिकः भवति?

(ख) छात्राणां रुचिः कस्मिन् न्यूना भवति?

II. एकवाक्येन उत्तरत– (1×2=2)

(क) कस्य प्रयोगं सर्वत्र दृश्यते?

(ख) चलभाषियन्त्रस्य प्रयोगं के कुर्वन्ति?

III. निर्देशानुसारम् उचितम् उत्तरं चित्वा लिखत– (½×4=2)

(क) 'जनाः' इति कर्तृपदस्य क्रियापदं किम् अस्ति?

(i) चालयन्ति (ii) कुर्वन्ति

(iii) भवति (iv) दृश्यते

(ख) 'अस्य' इति पदस्य विशेष्यपदं किम्?

(i) यन्त्रस्य (ii) छात्राणाम्

(iii) वाहनम् (iv) जना:

(ग) 'मानवा:' इत्यर्थे गद्यांशे किं पदं प्रयुक्तम्?

(i) वृद्धा: (ii) जना:

(iii) बाला: (iv) सर्वत्र

(घ) 'न्यून:' इति पदस्य गद्यांशे किं विलोमपदं प्रयुक्तम्?

(i) प्रयोग: (ii) अधिक:

(iii) जना: (iv) बाला:

**खण्डः-ख (रचनात्मक-कार्यम्) (15)**

2. अध: प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्च वाक्यानि लिखत– (1×5=5)



मञ्जूषा

| |
|---|
| चटका, पर्वता:, सन्ति, वृक्षा:, नदी, सुन्दरम्, हरीतिमा, पर्वतीयस्थलम्, उभयत: स्वच्छम्, मेघा:, खगौ, उड्डयत: |

3. भवत: अनुज: केशव: संगणकस्य अधिकम् उपयोगं करोति। अस्य दुरुपयोग: न कर्त्तव्य: इति विषये अनुजं प्रति प्रेषिते ज्येष्ठभ्रातु: अधोलिखित-पत्रे रिक्तस्थानानि मञ्जूषायां प्रदतशब्दै: पूरयत– (½×10=5)

प्रिय अनुज केशव! दिल्लीतः

तिथिः ....................

(i) ..........................

अत्र कुशलं (ii) ..........................। (iii) .......................... लिखितं पत्रम् अद्यैव प्राप्तम्। पत्रेण (iv) .......................... यत् भवान् सर्वदा एव (v) .......................... उपयोगं करोति। स्मरतु! अस्य केवलं (vi) .......................... एव उचितम् अस्ति। दुरुपयोगः तु सर्वथा (vii) .......................... भवति। अनेन न केवलं (viii) .......................... हानिः भवति अपितु (ix) .......................... अपि भवति। एषः भवतः पठनस्य कालः अस्ति। भविष्ये भवान् सदैव अस्य सदुपयोगम् एव करिष्यति इति एषः मम (x) ..........................

भवतः अग्रजः

मुकेशः

मञ्जूषा

| |
|---|
| समयस्य, ज्ञातम्, शुभाशिषः, हानिकारकः, विश्वासः |
| तत्रास्तु, संगणकस्य, मात्रा, सदुपयोगम्, नेत्रदोषः |

4. अधोलिखितं संवादं पठित्वा मञ्जूषायां प्रदत्तपदैः रिक्तस्थानानि पूरयत– (½x10=5)

शिक्षकः – सुप्रभातम्! छात्राः! किं कुरुथ यूयम्?

छात्राः – वयं विद्यालयस्य (i) .......................... कुर्मः।

शिक्षकः – शोभनम्! समयस्य (ii) .......................... आतीव आवश्यकः।

शाश्वतः – गुरुवर। 'सदुपयोगः' किं भवति?

शिक्षकः – समयस्य प्रत्येकं क्षणस्य (iii) .......................... उपयोगः 'सदुपयोगः इति कथ्यते।

प्रत्याशा – समयस्य सदुपयोगेन किं भवति?

शिक्षकः – अस्य बहवः (iv) .......................... सन्ति।

अर्पितः – के ते लाभाः?

शिक्षकः – ये जनाः समयानुसारं कार्यं (v) .......................... ते सर्वदा सुखं लभन्ते।

अम्रितः – कथं गुरुवर!

शिक्षकः – समयस्य पालकाः जनाः सर्वदा (vi) .......................... एव भवन्ति।

शरण्या – ये समयानुसारं कार्यं न कुर्वन्ति तेषां किं भवति?

शिक्षकः – ते तु (vii) .......................... भवन्ति।

शाश्वतः – आम्! आलस्ययुक्ताः जनाः तु सुखं न (viii) ..........................।

शिक्षकः – उचितम् उक्तम्! एतादृशाः जनाः (ix) .......................... कदापि उन्नतिं न कुर्वन्ति।

प्रत्याशा – गुरुवर! वयं कदापि आलस्ययुक्ताः न (x) .......................... इति मे संकल्पः।

मञ्जूषा

| |
|---|
| उचितरूपेण, जीवने, कुर्वन्ति, गृहकार्यं, सफलाः, सदुपयोगः, लाभाः, आलस्ययुक्ताः, लभन्ते, स्याम |

**खण्डः-ग (अनुप्रयुक्त-व्याकरणम्) (35)**

5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत– (1×3=3)

(i) <u>सदैव</u> सत्यं वदत।

(ii) छात्रजीवने परिश्रमः <u>अति</u> + <u>आवश्यकः</u>।

(iii) अस्य श्लोकस्य <u>अनु</u> + <u>अयं</u> कुरु।

6. (अ) विकल्पेभ्यः उचितं शब्दरूपं चित्वा वाक्येषु रिक्तस्थानानि पूरयत– (½×6=3)

(क) बुद्धिमन्तः जनाः .................... एव कार्याणि कुर्वन्ति।

(i) मत्या (ii) मति

(iii) मतयः (iv) मतिम्

(ख) आश्रमे बहवः .................... वसन्ति।

(i) साधू (ii) साधवः

(iii) साधुः (iv) साधुभ्यः

(ग) रामस्य .................... कौशल्या आगच्छति।

(i) मात्रा (ii) माता

(iii) मातुः (iv) मातरौ

(घ) .................... समूहः यज्ञं करोति।

(i) मुनीनाम् (ii) मुनये

(iii) मुनिः (iv) मुनिम्

(ङ) .................... वचनम् सर्वोपरि भवति।

(i) पितुः (ii) पितरम्

(iii) पिता (iv) पितरः

(च) सभायाम् अनेके .................... सन्ति।

(i) विद्वान् (ii) विद्वांसौ

(iii) विद्वांसः (iv) विदुषः

(आ) उचितं सर्वनामरूपं चित्वा रिक्तस्थानानि पूरयत– (1×3=3)

(क) .................... बालिका बुद्धिमती अस्ति।

(i) इयम् (ii) इमे

(iii) इमाः (iv) इमाम्

(ख) .................... वृक्षे अनेके खगाः वसन्ति।

(i) अनेन (ii) अस्मिन्

(iii) अनयोः (iv) अस्मात्

(ग) .................... कन्यायाः नाम किम् अस्ति?

(i) तस्याम् (ii) तयोः

(iii) तस्याः (iv) तासाम्

7. (अ) अधोलिखितेषु कोष्ठके प्रदत्तसङ्ख्यां संस्कृतेन लिखत– (1×2=2)

(क) संस्कृतकक्षायां ...................... (56) छात्राः सन्ति।

(ख) मम विद्यालये ...................... (83) अध्यापकाः सन्ति।

(आ) उचितम् उत्तरं चित्वा लिखत– (½×2=1)

(क) मम कक्षायाम् .................... छात्रा एव भाषणे कुशला अस्ति।

(i) एकः (ii) एका

(iii) एकम् (iv) एकस्मिन्

(ख) .................. मित्राणि मिलित्वा वसन्ति।

(i) चतस्रः (ii) चत्वारः

(iii) चत्वारि (iv) चतुरः

8. मञ्जूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयत– (1×3=3)

(i) ज्ञानात् .................. मुक्तिः न भवति।

(ii) जलम् प्रकृत्या .................... वहति।

(iii) ...................... मम विद्यालये अवकाशः आसीत्।

मञ्जूषा

| नीचैः, ह्यः, ऋते |
|---|

9. रेखाङ्कितपदेषु उपसर्गं संयोज्य पृथक् कृत्वा वा लिखत– (1×3=3)

(i) सिंहः गुहाम् प्रविशति।

(ii) शिष्यः गुरोः वचने विश्वसिति।

(iii) अस्माभिः परि + आवरणं दूषितं न कर्त्तव्यम्।

10. रेखाङ्कितपदेषु विभक्तिं तत्कारणं च लिखत– (1×5=5)

(i) भवनस्य उपरि कः अस्ति?

(ii) अस्मभ्यम् मोदकानि रोचन्ते।

(iii) नगरात् बहिः पर्वताः सन्ति।

(iv) अध्यापकः छात्रेषु स्निह्यति।

(v) विद्यालयस्य पुरतः क्रीडाक्षेत्रम् अस्ति।

11. अधोलिखितेषु समस्तपदानां समासस्य नामानि लिखत– (1×3=3)

(i) अनुरथम्

(ii) मातापितरौ

(iii) उपगङ्गम्

12. विकल्पेभ्यः उचितं धातुरूपं चित्वा वाक्येषु रिक्तस्थानानि पूरयत– (1×5=5)

(क) कलाकारः चित्रम् ........................।

(i) रचयति (ii) रचयामि

(iii) रचयसि (iv) रचयथ

(ख) वसन्त-ऋतौ वाटिका पुष्पैः ........................।

(i) अशोभत (ii) अशोभध्वम्

(iii) अशोभन्त (iv) अशोभे

(ग) वयं सर्वदा गुरुजनान् ........................।

(i) नंस्यामः (ii) नंस्यति

(iii) नंस्यन्ति (iv) नंस्यसि

(घ) त्वं शीघ्रं कार्यं ........................।

(i) कुरुतम् (ii) कुरु

(iii) कुरुत (iv) कुर्वन्तु

(ङ) सः प्रतिदिनं सुलेखं ........................।

(i) लिखेत् (ii) लिखेयुः

(iii) लिखेताम् (iv) लिखेः

13. वाक्येषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा लिखत– (1×4=4)

(i) शृगालः भोजनाय ....................... (भ्रम् + क्तवतु)।

(ii) तत्र एकः मूषकवृन्दः आगतः।

(iii) सर्वे छात्राः ....................... (पठ् + तुमुन्) विद्यालयं गच्छन्ति।

(iv) पुत्री पितरम् ....................... सेवितुम् अवकाशं गृह्णाति।

**खण्डः-घ (पठित-अवबोधनम्) (35)**

14. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत– (5)

एकदा सः काशीनगरे गङ्गायाः तटे एकस्मिन् कुटीरे शिष्यैः सह अतिष्ठत्। तत्र समीपम् एव एकः यात्री अपि अतिष्ठत्। ईर्ष्यया सः यात्री महर्षेः कुटीरम् आगत्य अकारणम् एव महर्षिं दुर्वचनानि वदति स्म। सः कदापि न प्रत्युत्तरत्। शिष्याः क्रुद्धाः अभवन्। महर्षिःतान् 'चिन्तां मा कुरूत, तूष्णीम् भवत' इति अकथयत्।

प्रश्नाः

(I) एकपदेन उत्तरत– (½×2=1)

(क) महर्षिः दयानन्दः कस्याः तटे अतिष्ठत्?

(ख) के क्रुद्धाः अभवन्?

(II) पूर्णवाक्येन उत्तरत– (1×2=2)

(क) महर्षिः शिष्यान् किम् अकथयत्?

(ख) यात्री महर्षिं किं वदति स्म?

(III) निर्देशानुसारम् उत्तरत– (½×4=2)

(क) 'शिष्या:' इति विशेष्यस्य विशेषणपदं किम्?

(i) अभवन् (ii) क्रुद्धाः

(iii) सह (iv) कुरूत

(ख) 'प्रसन्ना:' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

(i) दुर्वचनानि (ii) यात्री

(iii) चिन्तां (iv) क्रुद्धाः

(ग) 'अकथयत्' इति क्रियापदस्य कर्तृपदं किम्?

(i) तूष्णीम् (ii) भवत

(iii) महर्षि: (iv) इति

(घ) 'स: शिष्यै: सह अतिष्ठत्' इति वाक्ये अव्ययपदं किम्?

(i) कुटीरे (ii) स:

(iii) शिष्यै: (iv) सह

15. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत– (5)

क्षणश: कणश: चैव विद्याम् अर्थं च साधयेत्।

क्षणत्यागे कुत: विद्या कणत्यागे कुत: धनम्।।

प्रश्ना:

(I) एकपदेन उत्तरत– (½×2=1)

(क) मनुष्य: क्षणश: किं साधयेत्?

(ख) कस्य त्यागे धनम् न प्राप्यते?

(II) एकवाक्येन उत्तरत– (1×2=2)

(क) मनुष्य: कणश: किं साधयेत्?

(ख) कस्य त्यागे विद्या न प्राप्यते?

(III) निर्देशानुसारम् उत्तरत– (½×4=2)

(क) 'विद्याम् अर्थं च साधयेत्' अस्मिन् वाक्ये क्रियापदम् किम्?

(i) विद्याम् (ii) अर्थम्

(iii) च (iv) साधयेत्

(ख) 'धनम्' अस्य पदस्य किं पर्यायपदं श्लोके प्रयुक्तम्?

(i) क्षणशः (ii) विद्याम्

(iii) अर्थम् (iv) कणशः

(ग) 'अविद्या' अस्य पदस्य किं विलोमपदं श्लोके प्रयुक्तम्?

(i) अर्थम् (ii) विद्या

(iii) क्षणम् (iv) कणम्

(घ) 'विद्याम् अर्थं च साधयेत्' अस्मिन् वाक्ये अव्ययपदं किम्?

(i) विद्याम् (ii) अर्थम्

(iii) च (iv) साधयेत्

16. अधोलिखितं संवादं पठित्वा प्रश्नानाम् उत्तराणि लिखत– (5)

अन्यः छात्रः – किम् एते महोदयाः अस्माकं राष्ट्रस्य 'वैज्ञानिक-परामर्शदातारः' अपि अभवन्?

आचार्यः – आम्। अष्टाधिकनवति-एकोनविंशतिशततमे वर्षे (1998) एतेषां महोदयानां नियुक्तिः अस्मिन् पदे अभवत्।

अन्या छात्रा – अस्माकं राष्ट्रस्य सर्वोच्चं नागरिकं सम्मानं 'भारतरत्नम्' अपि एते महोदयाः प्राप्तवन्तः।

आचार्यः – आम्। सप्तनवति-अधिक-एकोनविंशतिशततमे वर्षे (1997) महोदयः इदं सम्मानं प्राप्तवान्। अयं महानुभावः स्वगुणानुरूपम् अस्माकं राष्ट्रस्य राष्ट्रपतेः पदम् अलङ्कृतवान्। अतीव प्रेरणादायकम् अस्ति अस्य महोदयस्य जीवनम्।

(I) एकपदेन उत्तरत– (½×2=1)

(क) अयं महानुभावः किं पदम् अलङ्कृतवान्?

(ख) अस्य महोदयस्य जीवनं कीदृशम् अस्ति?

(II) पूर्णवाक्येन उत्तरत– (1×2=2)

(क) डॉ. कलाममहोदयः कदा 'भारतरत्नम्' इति सम्मानं प्राप्तवान्?

(ख) अष्टाधिकनवति-एकोनविंशतिशततमे वर्षे (1998) एतेषां महोदयानां नियुक्तिः कस्मिन् पदे अभवत्?

(III) निर्देशानुसारम् उत्तरत– (½×4=2)

(क) 'महानुभावः' इति पदस्य विशेषणपदं किम्?

(i) अयम् (ii) अस्माकम्

(iii) पदम् (iv) राष्ट्रपतेः

(ख) भारतरत्नम् अपि एते महोदयाः' अस्मिन् वाक्ये अव्ययपदं किम्?

(i) भारतरत्नम् (ii) अपि

(iii) एते (iv) महोदयाः

(ग) 'लब्धवान्' इति अर्थे संवादे किम् पदं प्रयुक्तम्?

(i) अलङ्कृतवान् (ii) जीवनम्

(iii) प्राप्तवान् (iv) अभवत्

(घ) 'अभवन्' इति पदस्य कर्तृपदं किम्?

(i) महोदयाः (ii) अस्माकं

(iii) राष्ट्रस्य (iv) अपि

17. मञ्जूषायां प्रदत्तैः पदैः भावार्थे रिक्तस्थानानि पूरयित्वा भावार्थं लिखत– (1×4=4)

(अ) जलबिन्दुनिपातेन क्रमशः पूर्यते घटः।

भावार्थः – एकेन एकेन बिन्दुना एव (i) ........................ जलेन पूरितः भवति। एवमेव ये जनाः निरन्तरं प्रयासं कुर्वन्ति, ते शनैः शनैः कार्यकरणेन (ii) ........................ प्राप्स्यन्ति एव।

(आ) चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च।

भावार्थः – मनुष्यस्य जीवनं सदैव दुःखमयं न भवति। एवमेव सदैव सुखमयं न भवति। मनुष्यस्य (i) ........................ सुखस्य दुःखस्य च स्थितिः चक्रम् इव भवति। सुखानि (ii) ........................ च क्रमानुसारेण आगच्छन्ति गच्छन्ति वा। अतः वयं दुःखे सुखे च प्रभाविताः न भवेम।

मञ्जूषा

| दुःखानि, घटः, सफलतां, जीवने |
|---|

18. अधोलिखितौ श्लोकौ पठित्वा उचितपदैः अन्वयं पूरयत– (½×8=4)

(अ) प्रियवाक्य-प्रदानेन सर्वे तुष्यन्ति जन्तवः।
तस्मात् तदेव वक्तव्यं वचने का दरिद्रता।।

अन्वयः – प्रियवाक्य-प्रदानेन (i) ........................ जन्तवः (ii) ........................ तस्मात् तत् एव (iii) ........................, वचने का (iv) ........................।

(आ) वाणी रसवती यस्य, यस्य श्रमवती क्रिया।
लक्ष्मीः दानवती यस्य, सफलं तस्य जीवितम्।

अन्वयः – यस्य (i) ........................ रसवती, (ii) ........................ क्रिया श्रमवती, यस्य लक्ष्मीः (iii) ........................, तस्य जीवितं (iv) ........................ (भवति)।

19. अधोलिखितानि वाक्यानि कथाक्रमानुसारं लिखत– (1×5=5)

(क) शृगालः सूर्यं प्रति मुखं कृत्वा तिष्ठति।

(ख) शृगालः मूषकवृन्दं दृष्ट्वान्।

(ग) सर्वे मूषकाः चकिताः अभवन्।

(घ) शृगालं हृष्टं पुष्टं दृष्ट्वा मूषकाः चिन्तितवन्तः।

(ङ) मूषकाः स्वतीक्ष्णदन्तैः शृगालस्य नाशम् अकुर्वन्।

20. अधोलिखितेषु वाक्येषु रेखाङ्किितपदानि आधृत्य प्रश्ननिर्माणं कुरुत– (1×5=5)

(क) मूषकाः <u>शृगालस्य</u> उपरि आक्रमणम् अकुर्वन्।

(ख) <u>दुर्वचनानि</u> श्रुत्वा अपि महर्षिः तूष्णीम् अतिष्ठत्।

(ग) शृगालः <u>मूषकान्</u> अनुसरति।

(घ) <u>महर्षिदयानन्दः</u> प्रचुरफलानि अयच्छत्।

(ङ) मूषकाः <u>तीक्ष्णदन्तैः</u> शृगालस्य नाशम् अकुर्वन्।

21. अधोलिखितानां पदानाम् उचितार्थैः सह मेलनं कुरुत– (½×4=2)

| | |
|---|---|
| (क) जन्तवः | (i) ज्ञानम् |
| (ख) विद्याम् | (ii) धनम् |
| (ग) लक्ष्मीः | (iii) कार्यम् |
| (घ) क्रिया | (iv) प्राणिनः |

# संस्कृतम्

## ( संकलनात्मक मूल्याङ्कनम्-II )

## अंक विभाजन तथा उत्तर संकेत

**अधिकतम अङ्क : 90**

**निर्देश :** कोई भी ऐसा सही उत्तर जो परीक्षार्थी ने लिखा हो, परंतु निम्नलिखित उत्तर संकेत में सम्मिलित न हो तो उसके भी यथासंभव अंक दिए जाएँ।

| प्रश्न संख्या | उत्तर संकेत | मुख्य बिन्दु हेतु अंक | कुल अंक |
|---|---|---|---|
| | **खण्डः-क ( अपठित-अवबोधनम् ) ( 5 )** | | |
| 1. | I. (क) विविधयन्त्राणाम् | | |
| | (ख) अध्ययने | ½×2 | 1 |
| | II. (क) चलभाषियन्त्रस्य प्रयोगः तु सर्वत्र एव दृश्यते। | | |
| | (ख) बालाः वृद्धाः सर्वे एव चलभाषियन्त्रस्य प्रयोगं कुर्वन्ति। | 1×2 | 2 |
| | III. (क) (i) चालयन्ति | | |
| | (ख) (i) यन्त्रस्य | | |
| | (ख) (ii) जनाः | | |
| | (घ) (ii) अधिकः | ½×4 | 2 |
| | **खण्डः-ख ( रचनात्मक-लेखनम् ) ( 15 )** | | |
| 2. | चित्रवर्णनम् | 1×5 | 5 |
| | छात्राः चित्रानुरूपं स्वेच्छया कानिचित् पञ्च वाक्यानि लेखिष्यन्ति। | | |
| 3. | पत्रलेखनम्– | ½×10 | 5 |
| | (i) शुभाशिषः | | |
| | (ii) तत्रास्तु | | |
| | (iii) मात्रा | | |
| | (iv) ज्ञातम् | | |
| | (v) संगणकस्य | | |
| | (vi) सदुपयोगम् | | |
| | (vii) हानिकारकः | | |

| | | | |
|---|---|---|---|
| | (viii) समयस्य<br>(ix) नेत्रदोष:<br>(x) विश्वास: | | |
| 4. | संवादलेखनम्–<br>(i) गृहकार्यम्<br>(ii) सदुपयोग:<br>(iii) उचितरूपेण<br>(iv) लाभा:<br>(v) कुर्वन्ति<br>(vi) सफला:<br>(vii) आलस्ययुक्ता:<br>(viii) लभन्ते<br>(ix) जीवने<br>(x) स्याम | ½×10 | 5 |
| | **खण्ड:-ग ( अनुप्रयुक्त-व्याकरणम् ) ( 35 )** | | |
| 5. | (i) सदा + एव | 1 | |
| | (ii) अत्यावश्यक: | 1 | |
| | (iii) अन्वयम् | 1 | 3 |
| 6. | (अ) (क) (i) मत्या<br>(ख) (ii) साधव:<br>(ग) (ii) माता<br>(घ) (i) मुनीनाम्<br>(ङ) (i) पितु:<br>(च) (iii) विद्वांस: | ½×6 | 3 |

| | | | |
|---|---|---|---|
| | (आ) (क) (i) इयम्<br>(ख) (ii) अस्मिन्<br>(ग) (iii) तस्याः | 1×3 | 3 |
| 7. | (अ) (क) षट्पञ्चाशत्<br>(ख) त्र्यशीतिः | 1×2 | 2 |
| | (आ) (क) (ii) एका<br>(ख) (iii) चत्वारि | ½×2 | 1 |
| 8. | (i) ऋते<br>(ii) नीचैः<br>(iii) ह्यः | 1×3 | 3 |
| 9. | (i) प्र + विशति<br>(ii) वि + श्वसिति<br>(iii) पर्यावरणम् | 1×3 | 3 |
| 10. | (i) षष्ठी विभक्तिः उपरि योगे।<br>(ii) चतुर्थी विभक्तिः रुच् योगे।<br>(iii) पञ्चमी विभक्तिः बहिः योगे।<br>(iv) सप्तमी विभक्तिः स्निह् योगे।<br>(v) षष्ठी विभक्तिः पुरतः योगे। | 1×5 | 5 |
| 11. | (i) अव्ययीभावसमासः<br>(ii) द्वन्द्वसमासः<br>(iii) अव्ययीभावसमासः | 1×3 | 3 |
| 12. | (क) (ii) रचयति<br>(ख) (iii) अशोभत<br>(ग) (i) नंस्यामः<br>(घ) (ii) कुरु<br>(ङ) (i) लिखेत् | 1×5 | 5 |
| 13. | (i) भ्रमितवान् (ii) आ + गम् + क्त<br>(iii) पठितुम् (iv सेव् + तुमुन् | 1×4 | 4 |

| | | | |
|---|---|---|---|
| | **खंडः-घ (पठित-अवबोधनम्) (35)** | | |
| 14. | I. (क) गङ्गायाः (ख) शिष्याः | ½×2 | 1 |
| | II. (क) महर्षिः शिष्यान् अकथयत्–'चिन्तां मा कुरुत, तूष्णीम् भवत' इति। | | |
| | (ख) यात्री महर्षिं दुर्वचनानि वदति स्म। | 1×2 | 2 |
| | III. (क) (iii) क्रुद्धाः | | |
| | (ख) (iv) क्रुद्धाः | ½×4 | 2 |
| | (ग) (iii) महर्षिः | | |
| | (घ) (iv) सह | | |
| 15. | I. (क) विद्याम् | | |
| | (ख) कणस्य | ½×2 | 1 |
| | II. (क) धनम् | | |
| | (ख) क्षणस्य | 1×2 | 2 |
| | III. (क) (iv) साधयेत् | ½×4 | 2 |
| | (ख) (iii) अर्थम् | | |
| | (ग) (ii) विद्या | | |
| | (घ) (iii) च | | |
| 16. | I. (क) राष्ट्रपतेः / राष्ट्रपतिपदम् | | |
| | (ख) प्रेरणादायकम् | ½×2 | 1 |
| | II. (क) डॉ. कलाममहोदयः सप्तनवति-अधिक एकोनविंशतिशततमे वर्षे (1997) भारतरत्नम् इति सम्मानं प्राप्तवान्। | | |
| | (ख) अष्टाधिकनवति-एकोनविंशतिशततमे वर्षे 'वैज्ञानिक परामर्शदातारः' इति पदे अभवत्। | 1×2 | 2 |
| | III. (क) (i) अयम् | ½×4 | 2 |
| | (ख) (ii) अपि | | |
| | (ग) (iii) प्राप्तवान् | | |
| | (घ) (i) महोदयाः | | |

| | | | |
|---|---|---|---|
| 17. | (अ) (i) घटः<br>(ii) सफलतां<br>(आ) (i) जीवने<br>(ii) दुःखानि | 1×4 | 4 |
| 18. | (अ) (i) सर्वे (ii) तुष्यन्ति<br>(iii) वक्तव्यम् (iv) दरिद्रता<br>(आ) (i) वाणी<br>(ii) यस्य<br>(iii) दानवती<br>(iv) सफलं | ½×8 | 4 |
| 19. | 1. (ख) शृगालः मूषकवृन्दं दृष्ट्वान्।<br>2. (क) शृगालः सूर्यं प्रति मुखं कृत्वा तिष्ठति।<br>3. (ग) सर्वे मूषकाः चकिताः अभवन्।<br>4. (घ) शृगालं हृष्टं पुष्टं दृष्ट्वा मूषकाः चिन्तितवन्तः।<br>(v) (ङ) मूषकाः स्वतीक्ष्णदन्तैः शृगालस्य नाशम् अकुर्वन्। | 1×5 | 5 |
| 20. | (क) कस्य<br>(ख) कानि<br>(ग) कान्<br>(घ) कः<br>(ङ) कैः | 1×5 | 5 |
| 21. | (क) (iv) प्राणिनः<br>(ख) (i) ज्ञानम्<br>(ग) (ii) धनम्<br>(घ) (iii) कार्यम् | ½×4 | 2 |

# संस्कृतम्

**कक्षा-आठवीं** **प्रश्नानुसार विश्लेषण**

| क्र.सं. | शैक्षणिक उद्देश्य | विशेष उद्देश्य | विषयवस्तु | प्रश्न प्रकार | निर्धारित अङ्क विभाजन | अनुमानित कठिनाई-स्तर |
|---|---|---|---|---|---|---|
| 1. | ज्ञानम् / अवबोधनम् | | अपठित-अवबोधनम् | अति-लघूत्तरात्मकम्<br>लघूत्तरात्मकम्<br>बहूवैकल्पिकम् | 2<br>1<br>2 | B/C |
| 2. | अभिव्यक्तिः | | चित्राधारितम् | निबंधात्मकम् | 5 | B |
| 3. | अभिव्यक्ति- | | पत्रम् | निबंधात्मकम्<br>अति-लघूत्तरात्मकम् | 5 | A |
| 4. | ज्ञानम् / बोधनम् | | संवादलेखनम् | अति-लघूत्तरात्मकम् | 5 | B/A |
| 5. | स्मृत्यात्माकम् | | सन्धिः | अति-लघूत्तरात्मकम् | 3 | B/C |
| 6. | स्मृत्यात्माकम् | | शब्दरूपाणि | बहूवैकल्पिकम् | 3<br>3 | B |
| 7. | स्मृत्यात्माकम् | | संख्या | लघूत्तरात्मकम्<br>बहूवैकल्पिकम् | 3 | B/C |
| 8. | स्मृत्यात्माकम् | | अव्ययपदानि | अति-लघूत्तरात्मकम् | 3 | C |
| 9. | स्मृत्यात्माकम् | | उपसर्गाः | अति-लघूत्तरात्मकम् | 3 | C |
| 10. | स्मृत्यात्माकम् | | कारक-विभक्तिः | लघूत्तरात्मकम् | 5 | B/C |
| 11. | स्मृत्यात्माकम् | | समासः | अति-लघूत्तरात्मकम् | 3 | B/C |
| 12. | स्मृत्यात्माकम् | | धातुरूपाणि | बहुवैकल्पिकम् | 5 | B/C |
| 13. | स्मृत्यात्माकम् | | प्रत्ययाः | अति-लघूत्तरात्मकम् | 4 | B/C |
| 14. | ज्ञानम् / बोधनम् | | पठितगद्यांशः<br>पद्यांशः संवादः | अति-लघूत्तरात्मकम्<br>लघूत्तरात्मकम् | 3<br>6 | B/C |

| क्र.सं. | शैक्षणिक उद्देश्य | विशेष उद्देश्य | विषयवस्तु | प्रश्न प्रकार | निर्धारित अङ्क विभाजन | अनुमानित कठिनाई-स्तर |
|---|---|---|---|---|---|---|
| | | | | बहूवैकल्पिकम् | 6 | |
| 15. | ज्ञानम् / बोधनम् | | भावबोधनम् | अति-लघूत्तरात्मकम् | 4 | A |
| 16. | ज्ञानम् / बोधनम् | | अन्वय: | अति-लघूत्तरात्मकम् | 4 | C |
| 17. | ज्ञानम् | | घनाक्रम: | लघूत्तरात्मकम् | 5 | C |
| 18. | ज्ञानम् | | प्रश्ननिर्माणम् | लघूत्तरात्मकम् | 5 | B/A |
| 19. | ज्ञानम् / बोधनम् | | शब्दमेलनम् | अति-लघूत्तरात्मकम् | 2 | C |

MCQ (Multiple Choice Question) : 20
SA-I (Short Answer Type) : 18
SA-II (Short Answer Type) :
LA (Long Answer) : 15

*Difficult - A
Average - B
Easy - C